U.G. 3rd Semester Examination - 2023

SANSKRIT

[HONOURS]

Course Code : SANH-CC-T-5

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.

1. संस्कृतेन देवनागरीलिप्या च यथारुचि **दश** प्रश्नाः समाधेयाः : 2×10=20

   i) अभिज्ञानशकुन्तलनाटके कीदृशी प्रस्तावना अस्ति?

   ii) मारीचाश्रमे शकुन्तला केन प्रकारेण दिवसानयापयत्?

   iii) 'कुलपति' शब्दस्य कोऽर्थः?

   iv) दुष्यन्तस्य सेनापतिमते मृगयायाः के गुणाः सन्ति?

   v) क आसीत् यौगन्धरायणः? तस्य कः अभिसन्धिः आसीत्?

   vi) मारीचः कः आसीत्?

   vii) 'स्वसुखनिरभिलाषः' इत्यत्र समासनाम सविग्रहं लेख्यम्।

   viii) टीकां लिखतु- समुद्रगृहम्।

   ix) "अपि सन्निहितोऽत्र कुलपतिः?" इति कं प्रति कस्य उक्तिः?

   x) उदयनस्य वीणाया नाम किम् आसीत्?

[Turn Over]

xi) अभिज्ञानशकुन्तलम् इति नाटके उल्लिखितानि शिवस्य अष्टौ रूपाणि उल्लिख्यन्ताम्?

xii) भ्रमरवृत्तान्त: कस्य नाटकस्य कस्मिन् अङ्के दृश्यते?

xiii) "तत्र खल्वतिदारुणं व्यसनं संवृत्तम्"— कस्योक्तिरियम्? किञ्चात्र व्यसनं वक्त्रा प्रतिपाद्यते?

xiv) स्वप्नवासवदत्तम् इति नाटकस्य नान्दीश्लोकं लिखत।

2. यथामति सुरगिरा वङ्गभाषया आङ्गलभाषया वा **चत्वार:** प्रश्ना: समाधेया: 5×4=20

i) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य: :

a) स्वसुखनिरभिलाष: खिद्यसे लोकहेतो: प्रतिदिनमथवा ते वृत्तिरेवंविधैव।

अनुभवति हि मूर्ध्ना पादपस्तीव्रमूष्णं शमयति परितापं छायया संश्रितानाम्।।

b) अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधु नवमनास्वादितरसम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधि:।।

ii) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य: :

a) उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम्।

विकीर्णवाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि।।

b) नैवेदानीं दु:खिताश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ता:।

धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात्सा हि दग्धाप्यदग्धा।।

iii) संक्षेपेण यथेच्छमेकमवलम्ब्य टीकां लिखतु:

a) भट्टनारायण:

b) मुद्राराक्षसम्

c) शूद्रक:

iv) अभिज्ञानशकुन्तलनाटके सूत्रधारेण सह नट्या: कथोपकथनस्य नाटकीयतात्पर्यं लिखत।

v) अभिज्ञानशकुन्तलनाटके धीवरवृत्तान्तस्य नाटकीयतात्पर्यं विवृणुत।

vi) भवभूतिकृतस्य उत्तररामचरितम् इति दृश्यकाव्यस्य विषयवस्तु वैशिष्ट्यं च आलोच्यताम्।

3. यथेच्छं प्रश्न**द्वयस्य** समाधानं विधेयम्। **द्वयो:** प्रश्नयो**रेकस्य** उत्तरं संस्कृतेन देवनागरीलिप्या च लेख्यम् : 10×2=20

i) a) यथेच्छ**मेकस्य** सुरगिरा देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या : 6×1=6

इदं किलाव्याजमनोहरं वपुस्तप: क्षमं साधयितुं य इच्छति।

ध्रुवं स नीलोत्पलपत्रधाराया शमीलतां छेत्तुमृषिर्व्यवस्यति।।

अथवा

सुखमर्थो भवेद्दातुं सुखं प्राणा: सुखं तप:।

सुखमन्यद् भवेत् सर्वं दु:खं न्यासस्य रक्षणम्।

b) यथेच्छ**मेकस्या:** पङ्क्ते: भावसम्प्रसारणं कार्यम्, सरलसुरगिरा देवनागरीलिप्या च यवितव्याम्। 4×1=4

न प्रभातरल.... ज्योतिरुदेति वसुधातलात्।

अथवा

चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्ति:।

ii) 'उपमा कालिदासस्य' इति पङ्क्तेः याथार्थ्य प्रतिपाद्यताम्।

iii) भासस्य रचनाशैलीं प्रतिपादयत।

iv) दुर्वाससः अभिशापवृत्तान्तस्य नाटकीयतात्पर्यं प्रतिपादयत।